M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 1252

Title: Bagala Mukhi Stotra

1252

Incomplete

:	:	Bagalāmukhi Stōtrā	: Title
:	:		: Author
:	:		: Editor
:	:		: Year, Vols.
:	:		: Publisher
1252 :	:	Page 1 missing	: Remarks

बगलापूर्वतोरक्षदाग्नेयांचगदाधरी॥पीतांबरीदक्षिणेचस्तंभिनीचैवनिर्ऋतौ॥जिह्वाकीलिन्यतोरक्षेत्पश्चि
मेसर्वदामपि॥वायव्येचमदोन्मत्ताकौवैर्यांचत्रिशूलिनी॥ब्रह्मास्त्रदेवतेशान्येपातालेस्तब्धमातरः॥
ऊर्ध्वंरक्षेमहादेवीजिह्वास्तंभनकारिणी॥३॥एवंदशदिशोरक्षेद्बगलामातृकान्यसेत्॥नादंचमातृका
वर्णान्बगलाबीजमेवच॥नमोंतेनचवीन्यस्यमातृकास्थान्यतोंन्यसेत्॥अथमूलजपं॥गुह्यातिगुह्यगो
प्त्रीत्वंगृहाणास्मत्कृतंजपं॥सिद्धिर्भवतुमेदेवीत्वत्प्रसादान्महेश्वरी॥समाप्तं॥ ॥श्रीशंवंदे॥अथब
गलास्तोत्रं॥नारदउवाच॥मध्येसुधाब्धिमणिमंडपरत्नवेदिसिंहासनोपरिगतांपरिपीतवर्णां॥पी
तांबराभरणमाल्यविभूषितांगींदेवींभजामिधृतमुद्गरवैरिजिह्वां॥१॥जिह्वामादायकरेणदेवींवामेनश
त्रून्परिपीडयंतीं॥गदाभिघातेनचदक्षिणेनपीतांबराढ्यांद्विभुजांनमामि॥२॥चलत्कनककुंडलो
ल्लसितचारुगंडस्थलांलसत्कनकचंपकद्युतिमदिंदुबिंबाननां॥गदाहतविपक्षकांकलितलोलजिह्वा

चलत्कमरामिबगलामुखीविमुखहन्मनस्तंभिनी॥३॥पीयूषोदधिमध्यचारुविलसद्रक्तोत्पलेमंडपे
२ तत्सिंहासनमौलिपातितरिपुंप्रेतासनाध्यासिनी॥स्वर्णाभांकरपीडितारिरसनांभ्राम्यद्गदांविभ्रमां
स्वप्नेपश्यतितस्ययांतिविलयंसद्यस्तुसर्वापदः॥४॥देवित्वच्चरणांबुजेवितनुतेयःपीतपुष्पांजलिंमुद्रांवा
मकरेनिधायचपुनर्मंत्रीमनोज्ञाक्षरं॥पीतध्यानपरोथकुंभकवशान्मंत्रीस्मरेत्पार्थिवंतस्यामित्रमु
त्रमुखस्यवाचिहृदयेस्तंभोभवेत्तत्क्षणात्॥५॥मंत्रस्तावदलंविपक्षदलनेस्तोत्रंपवित्रंचतेयंत्रंवा
दिनियंत्रणंत्रिजगतांजैत्रंसुचित्रंपुनः॥मातश्रीबगलेतिनामललितंयस्यास्तिजंतोर्मुखेतन्नामस्म
रणेनसंसदिमुखस्तंभोभवेद्वाग्मिनां॥६॥वादीमूकतिरंकतिक्षितिपतिर्वैश्वानरःसीततिक्रोधी २
शाम्यतिदुर्जनःसुजनतिक्षिप्रानुगःखंजति॥गर्वीखर्वतिसर्वविच्चजडतित्वद्यंत्रणायंत्रितः
श्रीनित्येबगलामुखीप्रतिदिनंकल्याणितुभ्यंनमः॥दुष्टस्तंभनमुग्रविघ्नशमनंदारि[illegible]वि

द्रावणंभूभृत्संदमनंचलन्मृगदृशांचेतःसमाकर्षणं॥सौभाग्यैकनिकेतनंममदृशोःकारुण्यपूर्णेक्षणे
मृत्योर्मारणमाविरस्तुपुरतोमातस्त्वदीयंवपुः॥७॥मातर्भंजयमद्विपक्षवदनंजिह्वांचसंकीलयब्राह्मींमु
द्रयनाशयाशुधिषणामुग्रांगतिंस्तंभय॥शत्रून्चूर्णयचूर्णयाशुगदयागौरांगिपीतांबरेविघ्नौघंबगलेह
रप्रणमतांकारुण्यपूर्णेक्षणे॥८॥मातर्भैरविभद्रकालिविजयेवाराहिविश्वाश्रयेश्रीनित्येबगलेमहेशि
समयेकामेशिवामेरमे॥मातंगीत्रिपुरेपरात्परतरेस्वर्गापवर्गप्रदेदासोहंशरणागतःकरुणयाविश्वेश्वरीत्रा
हिमां॥१०॥संकष्टेचोरसंघेप्रकुपितनृपतौबंधनेवारिमध्येविद्यावादेविवादेप्रहरणसमयेदिव्यकालेनि
शायां॥वश्येवास्तंभनेवारिपुवधसमयेनिर्विषत्येरणेवागच्छन्तिष्ठन्स्वपन्वास्तवपठनमिदंकारयेदाशु
धैर्यं॥११॥त्वंविद्यापरमात्रिलोकजननीविघ्नौघविच्छेदिनीयोषाकर्षणकारिणीचसुमहद्बंधैकविध्वंसिनी
दुष्टोच्चाटनकारिणीजनमनःसंमोहसंधायिनीजिह्वाकीलनभैरवीविजयतेब्रह्मास्त्रविद्यापरा॥१२॥

निस्त्रेयस्कमनोरमंस्तवमिदंध्यायेत्पठेत्सादरंधृत्वायंत्रमिदंतथैवसमरेबाहौगलेवाकरे॥राजानोवरयोषितो
थकरिणःसर्पामृगेंद्राःखलास्तेवैयांतिविमोहिताःप्रतिदिनंलक्ष्मीःस्थिरानिर्भया॥२३॥अनुदिनमभिरामं
साधकायत्रिकालंपठतिभुवनमातःपूज्यतेदेववर्गैः॥भवतिपरमकृत्यस्तस्यदृष्ट्वाचलोकेभजतिपरम
सिद्धिःपाहिमांभोनमस्ते॥२४॥ ॥इतिश्रीरुद्रयामळेदेवीईश्वरसंवादेश्रीनारदमुनीविरचितंबगलामु
खीपीतांबरास्तोत्रंसंपूर्णं॥ ॥२५॥ ॥ ॥ श्रीसीतारामचंद्रार्पणमस्तु॥ ॥